दृश्च तगदक धिक्ष तदिदक्ष दं गदं गखो गखोक तक तक धिक तधिक् तधो टेण घोटेण घटे गख खोगगख खोग खोहट गें टगें खोह- टेण। इत्यस्य छन्दनम्। इति पारिगोघो। नादो यथा,—

"दांकारत्रितयं पूर्व्वं दां धिगिति ततस्त्रयम्।
दां दां धिकत्रयं यत्र इति नादः प्रकीर्त्तितः॥"
इति नादः।

"द्रुतं मानसमारब्धं शुद्धं कूटविमिश्रितम्।
अप्रयत्नमयं वाद्यं कथितं तदिहोच्यते॥" ०।

द्रुतमानत्वात् प्रतिताले यथा। ततत ततत तक्कि तक्कि दिदं धिगनधो धिगनधो धिक्ष धिक् धिक्ष धिक्ष धिक नगि नगमि घो घो धि धि धिः दां दां धिक्ष घो घो घो हघो हननि घो नन्निघो घोह घोह डेटि डेटि घोह घोह तटि तटि तटुक गीं गीं धगि घगि तत तधे तत तधे ततत गिडी भडी घोग घोग घों घोगग घोगघो ततती।

"इति सप्तपदान्याहुः कथितं वाद्यपण्डिताः।
प्रतितालेन तालेन पादवर्णसमाश्रितः॥
गन्धर्व्वपतिना पूर्व्वमुक्तं श्रीत्रास्त्रनर्त्तने।
सुधर्म्मारम्भमार्गेण कथितं प्रकटीकृतम्॥"

प्रहरणं यथा। घोगक्ता तह्निका धाग कट गगों दं घोग दिह्निक धिक्ष धिकटेण। इत्येक- ताख्यां प्रहरणम्। ०।

"वाद्यं विसृज्यते येन छन्दनं तन्निगद्यते।"
यथा, तह्विधो दिण टेण ततः। इति छन्दनम्॥०॥

मर्द्दलस्य योदग्राङ्गुलवामसुखो द्वादशाङ्गुल- दक्षिणसुखः। मुरजस्त्वष्टादशाङ्गुलवामसुखः चतुर्दशाङ्गुलदक्षिणसुखः मर्द्दलमुरजयोरयं भेदः। इति सङ्गीतदामोदरः।

मृदङ्गफलः, पुं, (मृदङ्गस्तदाकृति फलमस्य।) पनसवृक्षः। इति शब्दरत्नावली।

मृदङ्गफलिनी, स्त्री, (मृदङ्गवत् फलमस्त्यस्याः। इनिः ङीप् च।) कोषातकी। इति राजनिर्घण्टः। (विवरणोऽस्याः कोषातकीशब्दे ज्ञेयः।)

मृदङ्गी, स्त्री, (मृदङ्गः तदाकारफलमस्त्यस्या इति। मृदङ्ग+अर्शआद्यच् ङीष् च।) घोषातकी। इति रत्नमाला। घियाघोषा इति भाषा।

मृदा, स्त्री, (मृद्+टाप्।) मृत्तिका। इति द्विरूपकोषः।

मृदाकरः, पुं, वज्रम्। इति शब्दमाला।

मृदितः, त्रि, मृदधातोः कर्म्मणि क्तः। चूर्णी- कृतः। (यथा,—
"चित्रौषधतोये मृदितः फाण्ट इत्यभिधीयते।"
इति वैद्यकपरिभाषायाम्।)

मृदिनी, स्त्री, (मृद्+भावे क्तः। मृदः चूर्णी- करणमस्त्यस्याः। मृद+इनिः। स्त्रियां ङीप्।) प्रशस्तमृत्तिका। इति शब्दचन्द्रिका।

मृदुः, त्रि, (म्रद्यते म्रदितुं शक्यते इति। म्रद्+ "प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च।" उणा० १। २८। इति कुः।) अतीक्ष्णः। कोमलः। इत्यमरः। ३। १। ७८॥ (यथा,—
"मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च।"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे।)
गृहकन्यायां स्त्री। इति राजनिर्घण्टः॥ (पुं, नृपञ्जयराजपुत्रः। इति विष्णुपुराणे। ४। २१। ३॥)

मृदुकृष्णायसं, क्ली, (मृदु च तत् कृष्णायसं चेति।) सीसकम्। इति राजनिर्घण्टः।

मृदुगणः, पुं, (मृदूनां गणः।) चित्रानुराधा- मृगशिरोरेवतीनक्षत्राणि। यथा। चित्रामित्र मृगान्त्यभं मृदुगणः। इति ज्योतिस्तत्त्वम्।

मृदुगमना, स्त्री, (मृदु गमनमस्याः।) हंसी। इति राजनिर्घण्टः। मन्दगमना स्त्री च।

मृदुचर्म्मी, [न्] पुं, (मृदु कोमलं चर्म्म त्वक्। तदस्त्यस्य। चर्म्म+"ब्रीह्यादिभ्यश्च।" ५।२।११६। इति इनिः।) भूर्ज्जवृक्षः। इति राजनिर्घण्टः॥ कोमलत्वग्विशिष्टे, त्रि।

मृदुच्छदः, पुं, (मृदुः छदः पत्रमस्य।) भूर्जवृक्षः। इति हेमचन्द्रः। ४।२१०। गिरिजपीलुवृक्षः। इति जटाधरः॥ कुक्कुरद्रुः। शीतालः। इति राजनिर्घण्टः।

मृदुता, स्त्री, (मृदु+तल्+टाप्।) मृदुत्वम्। मृदोर्भावः। इति व्याकरणम्। (यथा, रघौ। ५। ५४॥
"स चानुनीतः प्रणतेन पश्चात्
मया महर्षिर्मृदुतामगच्छत्॥")

मृदुतालः, पुं, (मृदूनि तालफलान्यस्य।) शीताल- वृक्षः। इति राजनिर्घण्टः॥ कोमलतालश्च।

मृदुत्वक्, [च्] } पुं, भूर्ज्जवृक्षः। इत्यमरः।२।४।४६॥
मृदुत्वचः, } मृदवस्त्वचोऽस्य मृदुत्वक् चान्तः।
भूर्ज्जोऽथ भूर्जपत्रः स्यात् मृदुत्वक् पत्रपुष्पकः। इति कोषान्तरमिति मधुः। अदन्तनपुंसकत्वच- शब्देन चावन्तत्वचाशब्देन वा विग्रहे मृदु- त्वचोऽदन्तोऽपि भूर्ज्जो भुर्जो बहुपटो बहुत्वक्को मृदुत्वचः। इति स्वामी। इत्यमरटीकायां भरतः।

मृदुत्कं, क्ली, (मृदा मृत्परिणामेन उत् ऊर्द्ध्वं नीयते यत् इति। उत्+नी+डप्रकरणे "अन्येष्वपि दृश्यते।" ३। २। ४८। इत्यत्र काशिकोक्त्या डः। ततः स्वार्थे कन्।) सुवर्णम्। इति शब्दचन्द्रिका।

मृदुपत्रः, पुं, (मृदूनि पत्राण्यस्य।) नलः। इति राजनिर्घण्टः। कोमलपर्णे, क्ली। तद्वति, त्रि।

मृदुपत्री, स्त्री, (मृदूनि पत्राणि यस्याः।) चिल्ली- शाकम्। इति राजनिर्घण्टः।

मृदुपर्व्वकः, पुं, (मृदूनि पर्व्वाण्यस्य कप्।) वेत्रः। इति राजनिर्घण्टः॥ कोमलपर्व्वविशिष्टे, त्रि।

मृदुपुष्पः, पुं, (मृदूनि कोमलानि पुष्पाण्यस्य।) शिरीषवृक्षः। इति रत्नमाला। कोमलकुसुम- युक्ते, त्रि।

मृदुफलः, पुं, (मृदूनि फलान्यस्य।) विकङ्कतः। मधुनालिकेरिकः। विकण्टकवृक्षः। इति राज- निर्घण्टः॥ कोमलफलवति, त्रि।

मृदुलं, क्ली, (मृदु मृदुत्वमस्त्यस्य। मृदु+"सिध्मा- दिभ्यश्च।" ५। २। ९७। इति लच्।) जलम्। इति शब्दचन्द्रिका। कोमले, त्रि। इत्यमरः। ३। १। ७८॥ (यथा, शिशुपालवधे। ६। २।
"मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनोभरैः॥")

मृदुलोमकः, पुं, (मृदूनि स्पर्शसुखानि लोमानि यस्य सः। स्वार्थे कन्।) शशकः। इति हेमचन्द्रः। ४। ३६१॥ कोमलरोमविशिष्टे, त्रि।

मृदूत्पलं, क्ली, (मृदु कोमलं उत्पलम्।) नील- पद्मम्। इति शब्दचन्द्रिका।

मृद्गः, पुं, (मृदं पङ्कं गच्छति कारणत्वेन प्राप्नो- तीति। गम्+डः।) मत्स्यभेदः। इति संक्षिप्त- सारोणादिवृत्तिः।

मृद्वङ्गं, क्ली, (मृदु कोमलं अङ्गं यस्य।) वङ्गम्। इति हेमचन्द्रः। (मृदु च तदङ्गञ्चेति।) कोमलावयवश्च।

मृद्वी, स्त्री, (मृदु+"वोतोगुणवचनात्।" ४।१। ४४। इति ङीष्।) कोमलाङ्गी। इति मुग्ध- बोधव्याकरणम्। अपि च।

"सद्यः पुरीपरिसरेषु शिरीषमृद्वी
सीता जवात्त्रिचतुराणि पदानि गत्वा।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम्॥"
इति महानाटकम्।

कपिलद्राक्षा। इति राजनिर्घण्टः।

मृद्वीका, स्त्री, (मृदु+बाहुलकात् ईकन् टाप् च।) द्राक्षा। इत्यमरः। २। ४। १०७॥ (यथा, बृहत्संहितायाम्। ५५। १०।
"जम्बूवेतसवानीरकदम्बोदुम्बरार्जुनाः।
बीजपूरकमृद्वीकालकुचाश्च सदाडिमाः॥")
कपिलद्राक्षा। इति राजनिर्घण्टः।

मृध, उ ञ क्लिदि। इति कविकल्पद्रुमः॥ (भ्वा०- उभ०-अक०-सेट्। क्त्वावेट्।) उ, मर्द्धित्वा मृद्ध्वा। ञ, मर्धति मर्धते। क्लिदि आर्द्रीभावे। इति दुर्गादासः।

मृधं, क्ली, (मर्धते क्लिद्यतीति। मृध्+कः।) युद्धम्। इत्यमरः। २। ८। १०४॥ (यथा, हरिवंशे। १८२। १।
"अपयाते ततो देवे कृष्णे चैव महात्मनि।
पुनश्चावर्त्तत मृधं परेषां लोमहर्षणम्॥")

मृधा, अ, मृषा। इत्यमरटीकासारसुन्दरी।

मृन्मरुः, पुं, (मृत्सु मरुः।) पाषाणः। इति त्रिकाण्डशेषः।

मृश, श औ मृशि। इति कविकल्पद्रुमः॥ (तुदा०-पर० सक०-अनिट्।) श, मृशति। औ, अमार्क्षीत् अम्राक्षीत् अमृक्षत्। मृशि इति तालव्यान्तस्यैव क्विपि रूपम्। तेन अनि-